248sk12

१२

रामायणम् - राम-हनूमत्-संगमः

प्रस्तावना

अस्मिन् जगति प्रसिद्धेषु प्रह्लादादिभक्तेषु अन्यतमः तावत् हनुमान्। भगवतः रामस्य महान् भक्तः आसीत् अयं हनुमान्। स्वस्य सम्पूर्णे हृदये केवलं रामः एव विराजते इति दर्शनाय स स्ववक्षः विदार्य तत्र प्रभुः रामः प्रभुपत्नी सीता च विराजेते इति दर्शितवान्। अधुनापि एवम् उच्यते यत् यत्र यत्र रघुनाथकीर्तनं क्रियते तत्र तत्र अद्यापि हनुमान् उपस्थितः भवति। एतादृशस्य भक्तस्य प्रभुणा सह प्रथमः साक्षात्कारः कीदृशः आसीत् इति चिन्तनेन एव अस्माकं मनसि महान् आनन्दः उत्पद्यते। अतः अस्मिन् पाठे वयं तम् एव प्रथमसाक्षात्कारं सप्रसङ्गम् अवलोकयामः। तत्र हनुमान् सुग्रीवादेशानुसारं भिक्षुकवेषेण रामलक्ष्मणयोः परिचयं ज्ञातुं तयोः समीपं गच्छति। परस्परस्वरूपम् अजानन्तौ एव भक्तशिष्यौ उभौ उभाभ्यां सह प्रथमं मिलतः। ततः परं किं भविष्यति इति तु वयं पाठस्य पठनानन्तरं स्वयं ज्ञास्यामः। अस्मिन् पाठे दश श्लोकाः सन्ति। अस्य पाठस्य पठनेन अवश्यम् एव अस्माकं महान् आनन्दः भविष्यति।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- रामहनुमतोः प्रथमसाक्षात्कारविषये ज्ञातुं शक्नुयात्।
- हनुमतः वाग्माधुर्यं ज्ञातुं शक्ष्यति।
- रामलक्ष्मणयोः वीरत्वविषयकं बोधं प्राप्स्यति।
- रामायणकाले जनानाम् आचारः कथम् आसीत् इति ज्ञास्यति।
- श्लोके स्थितानां पदानाम् अन्वयः केन प्रकारेण कर्तव्यः इति जानीयात्।
- श्लोकानां व्याख्या केन प्रकारेण कर्तव्या इत्यस्मिन् विषये ज्ञास्यति।
- उपमालङ्कारस्य विषये किञ्चित् ज्ञानं प्राप्स्यति।

१२.१) मूलपाठः

वचो विज्ञाय हनुमान् सुग्रीवस्य महात्मनः ।
पर्वतात् ऋष्यमूकात् तु पुप्लुवे यत्र राघवौ ॥१॥

कपिरूपम् परित्यज्य हनुमान् मारुतात्मजः ।

भिक्षुरूपम् ततो भेजे शठबुद्धितया कपिः ॥२॥

ततः च हनुमान् वाचा श्लक्ष्णया सुमनोज्ञया ।
विनीतवत् उपागम्य राघवौ प्रणिपत्य च ॥३॥

आबभाषे च तौ वीरौ यथावत् प्रशशंस च ।
संपूज्य विधिवद् वीरौ हनुमान् वानरोत्तमः ॥४॥

उवाच कामतो वाक्यम् मृदु सत्यपराक्रमौ ।
राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ ॥५॥

देशम् कथम् इमम् प्राप्तौ भवन्तौ वरवर्णिनौ ।
त्रासयन्तौ मृगगणान् अन्यांश्च वनचारिणः ॥६॥

पम्पातीररुहान् वृक्षान् वीक्षमाणौ समन्ततः ।
इमाम् नदीं शुभजलां शोभयन्तौ तरस्विनौ ॥७॥

धैर्यवन्तौ सुवर्णाभौ कौ युवाम् चीरवाससौ ।
निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः ॥८॥

सिंहविप्रेक्षितौ वीरौ महाबलपराक्रमौ ।
शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ ॥९॥

श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ ।
हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ ॥१०॥

१२.२) इदानीं मूलपाठम् अवगच्छाम

वचो विज्ञाय हनुमान् सुग्रीवस्य महात्मनः।
पर्वतादृष्यमूकात् तु पुप्लुवे यत्र राघवौ।।१।।

अन्वयः - हनुमान् महात्मनः सुग्रीवस्य वचः विज्ञाय यत्र राघवौ (आस्ताम्), ऋष्यमूकात् पर्वतात् तु (तत्र) पुप्लुवे।

अन्वयार्थः - हनुमान् महात्मनः महाबुद्धेः सुग्रीवस्य सुग्रीवनामकस्य वानरराजस्य वचः वचनं विज्ञाय अवधार्य यत्र राघवौ रामलक्ष्मणौ (आस्ताम्), ऋष्यमूकात् ऋष्यमूकनामधेयात् पर्वतात् गिरेः तु (तत्र) पुप्लुवे जगाम।

सरलार्थः - सुग्रीवसचिवः हनुमान् कपिराजस्य सुग्रीवस्य वचनानुसारं रामलक्ष्मणयोः स्वरूपं जिज्ञासुः ऋष्यमूकपर्वतात् तयोः समीपं गतवान् इति।

तात्पर्यार्थः - अनेन श्लोकेन महर्षिः वाल्मीकिः रामलक्ष्मणाभ्यां सह हनुमतः प्रथमसाक्षात्कारं वर्णयितुम् आरभते। कपिराजः सुग्रीवः धनुर्बाणादिशस्त्रयुक्तौ दीर्घबाहुसम्पन्नौ रामलक्ष्मणौ दूरात् दृष्टवान्, अतः तौ वालिना प्रेषितौ इति मत्वा स भीतः सञ्जातः। तस्मात् स तयोः आगमनकारणज्ञानाय स्वसचिवं हनुमन्तम् आदिष्टवान्। हनुमान् च तद्वचनानुसारं तयोः आगमनकारणं ज्ञातुम् ऋष्यमूकपर्वतात् तयोः समीपं प्रस्थितः।

व्याकरणविमर्शः -

- विज्ञाय - विपूर्वकात् ज्ञानार्थकात् ज्ञाधातोः ल्यप्प्रत्यये विज्ञाय इति रूपम्।
- पुप्लुवे - गमनार्थकात् प्लुङ्-धातोः लिटि प्रथमपुरुषैकवचने पुप्लुवे इति रूपम्।

सन्धिकार्यम् -

- वचो विज्ञाय = वचः + विज्ञाय। (विसर्गसन्धिः)
- पर्वतादृष्यमूकात् = पर्वतात् + ऋष्यमूकात्। (जश्त्व-सन्धिः))

प्रयोगपरिवर्तनम् - हनुमता महात्मनः सुग्रीवस्य वचः विज्ञाय यत्र राघवाभ्याम् (अभूयत), ऋष्यमूकात् पर्वतात् तु (तत्र) पुप्लुवे।

कपिरूपं परित्यज्य हनुमान् मारुतात्मजः।
भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः।।२।।

अन्वयः - मारुतात्मजः कपिः हनुमान् शठबुद्धितया कपिरूपं परित्यज्य ततः भिक्षुरूपं भेजे।

अन्वयार्थः - मारुतात्मजः मारुतपुत्रः कपिः वानरः हनुमान् शठबुद्धितया धूर्तबुद्धितया कपिरूपं वानररूपं परित्यज्य विहाय ततः भिक्षुरूपं भिक्षुकवेषं भेजे प्राप।

सरलार्थः - मारुतपुत्रः हनुमान् वञ्चकबुद्ध्या स्वस्वरूपं वानररूपम् आच्छाद्य भिक्षुकवेषं धृत्वा रामलक्ष्मणोः समीपं गतः।

तात्पर्यार्थः - वानराणां शठबुद्धित्वं लोके प्रसिद्धं वर्तते। तस्मात् सुग्रीववचनानुसारं रामलक्ष्मणयोः समीपं गन्तुम् उद्यतः हनुमान् चिन्तितवान् यत् - हनुमान् तु वानरः, अतः सः अपि शठबुद्धिसम्पन्नः इति विज्ञाय रामो यदि तेन सह भाषणं न कुर्यात् इति। तस्मात् स आत्मनः स्वरूपं वानररूपम् आच्छाद्य भिक्षुकवेषं धृतवान्। भिक्षुकादिदरिद्रेषु मनुष्येषु महतां सदैव दयाभावः दृश्यते। अतः रामलक्ष्मणयोः अपि भिक्षुकवेषधारिणि तस्मिन् दयाभावः भविष्यति इति चिन्तितवान् हनुमान्। तस्मात् एव स रूपान्तरम् अगृहीत्वा भिक्षुकरूपम् एव गृहीतवान्। तेन रामलक्ष्मणौ दीनदयालू इति हनुमान् प्रागेव ज्ञातवान् इति सूच्यते। महर्षिः वाल्मीकिः हनुमतः बुद्धेः प्रभावम् अपि वर्णयति प्रस्तुतश्लोकेन।

व्याकरणविमर्शः -

- परित्यज्य - परिपूर्वकात् त्यागार्थकात् त्यज्-धातोः ल्यप्प्रत्यये परित्यज्य इति रूपम्।
- मारुतात्मजः - मारुतस्य आत्मजः मारुतात्मजः इति षष्ठीतत्पुरुषसमासः।
- भेजे - सेवार्थकात् भज्-धातोः लिटि प्रथमपुरुषैकवचने भेजे इति रूपम्।

सन्धिकार्यम् -

- ततो भेजे = ततः + भेजे। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - मारुतात्मजेन कपिना हनुमता शठबुद्धितया कपिरूपं परित्यज्य ततः भिक्षुरूपं भेजे।

ततश्च हनुमान् वाचा श्लक्ष्णया सुमनोज्ञया।
विनीतवदुपागम्य राघवौ प्रणिपत्य च।।३।।
आबभाषे च तौ वीरौ यथावत् प्रशशंस च।

अन्वयः - ततः विनीतवत् हनुमान् तौ वीरौ राघवौ उपागम्य प्रणिपत्य च श्लक्ष्णया सुमनोज्ञया वाचा आबभाषे यथावत् प्रशशंस च।

अन्वयार्थः - ततः भिक्षुकरूपाधारणानन्तरं हनुमान् विनीतवत् विनयी सन् तौ वीरौ शूरौ राघवौ रामलक्ष्मणौ उपागम्य आगम्य प्रणिपत्य प्रणम्य च श्लक्ष्णया मधुरया सुमनोज्ञया मनोहरया वाचा गिरा आबभाषे भाषितवान् यथावत् प्रशशंस प्रशस्तवान् च।

सरलार्थः - भिक्षुकवेषधारी हनुमान् विनयभावयुक्तः सन् रामलक्ष्मणयोः समीपं गतवान्, तत्र गत्वा च स आदौ तयोः प्रणामं कृतवान्। तदनन्तरं स्वस्य मधुरया रम्यया च वाण्या ताभ्यां सह वार्तालापम् आरब्धवान्, ततः तयोः वीरयोः यथोचितं स्तुतिं च कृतवान्।

तात्पर्यार्थः - अस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमतः विनयं वर्णयति। भिक्षुकरूपाधारणानन्तरं हनुमान् रामलक्ष्मणयोः आगमनकारणं जिज्ञासुः तयोः समीपम् उपागतः। तत्र सविनयम् आगत्य स आदौ तौ प्रणतवान्। भिक्षुरूपः हनुमान् रामलक्ष्मणौ प्रणतवान् इत्यनेन गृहस्थान् प्रति भिक्षुणा प्रणामः कर्तव्यः इति ज्ञायते। तदनन्तरं हनुमान् स्वस्य मधुरेण वचसा तयोः यथावत् प्रशंसां कृतवान्। यथावत् प्रशंसां कृतवान् इत्यनेन हनुमान् तयोः मिथ्यास्तुतिं न कृतवान् इति ज्ञापयितुम् इच्छति महर्षिः वाल्मीकिः। तदनन्तरं स स्वस्य सुमधुरया सुमनोहरया अर्थतः अतिरम्यया च वाण्या ताभ्यां सह भाषितुम् आरब्धवान्। अनेन श्लोकेन हनुमतः वाग्माधुर्यमपि वर्णयति महर्षिः वाल्मीकिः।

व्याकरणविमर्शः -

- सुमनोज्ञया - सुष्ठु मनोज्ञं सुमनोज्ञम् इति गतिसमासः, तया सुमनोज्ञया।
- उपागम्य - उपपूर्वकात् गमनार्थकात् गम्-धातोः ल्यप्प्रत्यये उपागम्य इति रूपम्।
- प्रणिपत्य - प्रपूर्वकात् निपूर्वकात् च गमनार्थकात् पत्-धातोः ल्यप्प्रत्यये प्रणिपत्य इति रूपम्।

- आबभाषे - आपूर्वकात् भाष्-धातोः लिटि प्रथमपुरुषैकवचने आबभाषे इति रूपम्।
- प्रशशंस - प्रपूर्वकात् स्तुस्त्यर्थकात् शंस्-धातोः लिटि प्रथमपुरुषैकवचने प्रशशंस इति रूपम्।

सन्धिकार्यम् -

- ततश्च = ततः + च। (विसर्गसन्धिः)
- विनीतवदुपागम्य = विनीतवत् + उपागम्य। (जश्त्व-सन्धिः)

प्रयोगपरिवर्तनम् - ततः विनीतवत् हनुमता तौ वीरौ राघवौ उपागम्य प्रणिपत्य च श्लक्ष्णया सुमनोज्ञया वाचा आबभाषे यथावत् प्रशशंसे च।

संपूज्य विधिवद्वीरौ हनुमान् वानरोत्तमः।।४।।
उवाच कामतो वाक्यं मृदु सत्यपराक्रमौ।

अन्वयः - वानरोत्तमः हनुमान् वीरौ सत्यपराक्रमौ (रामलक्ष्मणौ) विधिवत् संपूज्य कामतः मृदु वाक्यम् उवाच।

अन्वयार्थः - वानरोत्तमः मर्कटश्रेष्ठः हनुमान् वीरौ शूरौ सत्यपराक्रमौ सत्यपालकौ (तौ रामलक्ष्मणौ) विधिवत् यथाविधि संपूज्य पूजयित्वा कामतः सुग्रीवेच्छानुसारात् मृदु कोमलं वाक्यं वचनं उवाच उक्तवान्।

सरलार्थः - हनुमान् रामलक्ष्मणयोः समीपं गत्वा, आदौ विध्यनुसारं तयोः पूजनं कृतवान्। ततः सुग्रीवेच्छानुसारं स स्वस्य मधुरया मनोहरया वाचा ताभ्यां सह मृदु वाक्यं वक्तुम् आरब्धवान्।

तात्पर्यार्थः - सुग्रीवादेशानुसारं हनुमान् धृतभिक्षुकवेषः रामलक्ष्मणौ उपागतः। तौ प्राप्य च सः अतिथेः पूजनविषये यादृशः विधिः निर्दिष्टः अस्ति, तदनुसारेण तयोः सत्यपालकयोः पूजनमपि कृतवान्। रामलक्ष्मणौ सत्यपराक्रमौ इत्यनेन तयोः माहाम्यं ज्ञायते। अत एव तौ पूज्यौ इति निश्चितवान् हनुमान्। शिष्टाः जनाः सर्वदा एव पूज्यानां पूजनं कुर्वन्ति। अतः हनुमान् अपि पूज्ययोः रामलक्ष्मणयोः पूजनेन शिष्टमार्गस्य एव पथिकः इति ज्ञायते। वस्तुतः हनुमान् रामोपरि तस्य भक्तिवशात् एव तस्य पूजनं कृतवान् इत्यपि वक्तुं शक्यते। पूजनानन्तरं च हनुमान् यदर्थं सुग्रीवः तम् अत्र प्रेषितवान् तत् स्मरणे संस्थाप्य स्वस्य मधुरवचनेन तत् वक्तुम् आरब्धवान्। हनुमान् वानरोत्तमः इत्यनेन हनुमतः माहात्म्यं सूचयति महर्षिः।

व्याकरणविमर्शः -

- संपूज्य – सम्-पूर्वकात् पूज्-धातोः ल्यप्प्रत्यये संपूज्य इति रूपम्।
- वानरोत्तमः - वानराणाम् उत्तमः वानरोत्तमः इति षष्ठीतत्पुरुषसमासः।
- उवाच – भाषणार्थकात् वच्-धातोः लिटि प्रथमपुरुषैकवचने उवाच इति रूपम्।
- सत्यपराक्रमौ - सत्यम् एव पराक्रमः ययोस्तौ सत्यपराक्रमौ इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- विधिवद्वीरौ = विधिवत् + वीरौ। (जश्त्व-सन्धिः)
- कामतो वाक्यम् = कामतः + वाक्यम्। (विसर्गसन्धिः)

प्रयोगपरिवर्तनम् - वानरोत्तमेन हनुमता वीरौ सत्यपराक्रमौ (रामलक्ष्मणौ) विधिवत् संपूज्य कामतः मृदु वाक्यम् ऊचे।

राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ।।५।।
देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ।
त्रासयन्तौ मृगगणान् अन्यांश्च वनचारिणः।।६।

अन्वयः - राजर्षिदेवप्रतिमौ संशितव्रतौ वरवर्णिनौ, मृगगणान् अन्यान् वनचारिणः च त्रासयन्तौ भवन्तौ तापसौ इमं देशं कथं प्राप्तौ।

अन्वयार्थः - राजर्षिदेवप्रतिमौ राजर्षीणां देवतानां च प्रतिकृतिसदृशौ संशितव्रतौ तीक्ष्णव्रतपालकौ वरवर्णिनौ ब्रह्मचारिश्रेष्ठौ मृगगणान् हरिणसमूहान् अन्यान् इतरान् वनचारिणः अरण्यचारिणः च त्रासयन्तौ स्वतेजसा धर्षयन्तौ भवन्तौ तापसौ तपस्विनौ इमम् एतं देशं प्रदेशं कथं केन प्रकारेण प्राप्तौ आगतौ।

सरलार्थः - हनुमान् रामलक्ष्मणयोः पूजनं प्रशंसादिकं त कृत्वा तौ पृष्टवान् यत् - राजर्षीणां देवतानां च यथा प्रतिकृतिः भवति, तादृशप्रतिकृतिविशिष्टौ कठोरव्रतपालकौ भवन्तौ स्तः। परन्तु भवन्तौ ब्रह्मचारिवरौ वनस्थान् मृगान् अन्यान् वनचारिणः जीवान् च भीतान् कुर्वन्तौ केन प्रकारेण इमं दुर्गमं देशम् आगतौ इति।

तात्पर्यार्थः - रामलक्ष्मणौ ऋष्यमूकपर्वतं प्रति आगतवन्तौ। अत एव हनुमान् तयोः आगमनकारणं पृष्टवान् प्रस्तुतश्लोकेन। देवर्षीणां देवतानां च यादृशी देहाकृतिः भवति, रामलक्ष्मणयोः शरीरयोः अपि तादृशी एव आकृतिः आसीत् । किञ्च तौ तपस्विनौ कठोरव्रतपालकौ आस्ताम्। ब्रह्मचर्यपालनात् ब्रह्मचारिषु महत् तेजः उत्पद्यते, यत् तेन साधारणाः किञ्चित् त्रस्ता भवन्ति। अत एव रामलक्ष्मणयोः ब्रह्मचर्यतेजःप्रभावात् वनस्थाः मृगाः किञ्च अन्याः वन्यप्राणिनः भीताः सञ्जाताः। तस्मात् एव हनुमान् तौ प्रति पृष्टवान् यत् सुन्दराकृतिविशिष्टौ एवंविध-ब्रह्मचर्यतेजोविशिष्टौ भवन्तौ तपस्विनौ, यत्र साधारणाजनाः नागच्छन्ति तादृशम् इमं दुर्गमं देशं कथम् आगतौ इति। वस्तुतः प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः रामलक्ष्मणयोः शरीरसौन्दर्यं कठोरव्रतपालकत्वं ब्रह्मचर्यतेजःप्रभावत्वं च वर्णयति।

व्याकरणविमर्शः -

- राजर्षिदेवप्रतिमौ - राजर्षयः च देवाश्च राजर्षिदेवाः इति इतरेतरयोगद्वन्द्वसमासः। राजर्षिदेवानां प्रतिमा इव प्रतिमा ययोः तौ राजर्षिदेवप्रतिमौ इति उपमानपदपूर्वकबहुव्रीहिसमासः।
- संशितव्रतौ - संशितौ (तीक्ष्णौ) व्रतौ ययोस्तौ संशितव्रतौ इति बहुव्रीहिसमासः।
- वरवर्णिनौ - वरौ च तौ वर्णिनौ वरवर्णिनौ इति कर्मधारयसमासः।

- त्रासयन्तौ - भयार्थकात् त्रास-धातोः णिच्प्रत्यये शतृप्रत्यये च प्रथमाबहुवचने त्रासयन्तौ इति रूपम्।
- मृगगणान् - मृगानां गणाः मृगगणाः इति षष्ठीतत्पुरुषसमासः, तान् मृगगणान्।
- वनचारिणः - वने चरन्ति इति वनचारिणः। अस्य अर्थो हि वन्यपशवः इति।

सन्धिकार्यम् -

- अन्यांश्च = अन्यान् + च। (हल्-सन्धिः)

प्रयोगपरिवर्तनम् -

- राजर्षिदेवप्रतिमाभ्यां संशितव्रताभ्यां वरवर्णिभ्यां मृगगणान् अन्यान् वनचारिणः च त्रासयद्भ्यां भवद्भ्यां तापसाभ्याम् अयं देशः कथं प्राप्तः।

पम्पातीररुहान् वृक्षान् वीक्षमाणौ समन्ततः।
इमां नदीं शुभजलां शोभयन्तौ तरस्विनौ।।७।।
धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ।
निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः।।८।।

अन्वयः - समन्ततः पम्पातीररुहान् वृक्षान् वीक्षमाणौ इमां शुभजलां नदीं शोभयन्तौ तरस्विनौ धैर्यवन्तौ सुवर्णाभौ चीरवाससौ निःश्वसन्तौ वरभुजौ इमाः वन्याः प्रजाः पीडयन्तौ युवां कौ।

अन्वयार्थः - समन्ततः चतुर्दिक्षु पम्पातीररुहान् पम्पातीरे जातान् वृक्षान् महीरुहान् वीक्षमाणौ पश्यन्तौ इमाम् एतां शुभजलां पवित्रसलिलां नदीं सरितं शोभयन्तौ भूषयन्तौ तरस्विनौ अतिबलवन्तौ धैर्यवन्तौ धैर्यशालिनौ सुवर्णाभौ स्वर्णसदृशशरीरौ चीरवाससौ जीर्णवस्त्रधरौ निःश्वसन्तौ क्लान्तौ वरभुजौ सुन्दरभुजौ इमाः एताः प्रजाः वन्यान् पीडयन्तौ पीडां प्रापयन्तौ युवां भवन्तौ कौ।

सरलार्थः - हनुमान् रामलक्ष्मणौ प्रति पृष्टवान् यत्- पम्पासरोवरस्य तटे स्थितान् वृक्षान् पश्यन्तौ किञ्च इमां पवित्रसलिलविशिष्टां पम्पानदीं स्वसौन्दर्येण भूषयन्तौ अतिबलवन्तौ स्वर्णसदृशदेहविशिष्टौ धैर्यशालिनौ जीर्णवस्त्रधरौ वनसञ्चारवशात् क्लान्तौ सुन्दरबाहुसम्पन्नौ एतान् वन्यान् स्वदुःखदर्शनेन दुःखीकुर्वन्तौ युवां कौ इति।

तात्पर्यार्थः - प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः, यत्र हनुमान् रामलक्ष्मणयोः परिचयं ज्ञातुं समागतः तत् स्थानं वर्णयति। तत् च स्थानं पम्पासरोवरतीरस्थम्। पम्पासरोवरस्य जलम् अतिपवित्रम् आसीत्। अतिबलवन्तौ तौ रामलक्ष्मणौ च तयोः पुरस्तात् पम्पासरोवरस्य तटे जातान् वृक्षान् पश्यन्तौ आस्ताम्। तयोः सौन्दर्येण स सरोवरः शोभितो जातः।

सुवर्णस्य यथा कान्तिः विद्यते तादृशी कान्तिः आसीत् तयोः शरीरे। परन्तु एवंकान्तियुक्तदेहसत्त्वेऽपि तयोः परिधाने आस्ताम् द्वौ अतिजीर्णवस्त्रौ। सुबाहुविशिष्टौ तौ सम्पूर्णं दिवसं व्याप्य इदं स्थानं प्राप्तुं वने सञ्चरितवन्तौ। अत एव वनसञ्चारात् सम्प्रति तौ अतीव क्लान्तौ सञ्जातौ। तयोः इदं क्लान्तिरूपं दुःखं दृष्ट्वा वनवासिनः जनाः अपि पीडिता जाताः। तस्मात् हनुमान् पृष्टवान् यत्

- पम्पासरोवरस्य तटे जातान् वृक्षान् पश्यन्तौ स्वसौन्दर्येण च तं सरोवरं शोभयन्तौ स्वर्णसदृशदेहविशिष्टौ अपि जीर्णवस्त्रधरौ सुबाहुसम्पन्नौ वनसञ्चारात् क्लान्तौ स्वदुःखदर्शनेन च अन्यान् अरण्यवासिनः पीडयन्तौ युवां कौ, को वा युवयोः परिचयः, केन वा कारणेन इमं दुर्गमं देशम् आगतौ इति। वस्तुतः अत्र पम्पासरोवस्य विस्तृतत्वात् तदर्थे नदी- इति प्रयोगः कृतः।

व्याकरणविमर्शः -

- पम्पातीररुहान् - पम्पायाः तीरं पम्पातीरम् इति षष्ठीतत्पुरुषसमासः। पम्पातीरे रोहन्ति इति पम्पातीररुहाः, तान् पम्पातीररुहान्।
- वीक्षमाणौ - विपूर्वकात् दर्शनार्थकात् ईक्ष्-धातोः शानच्प्रत्यये प्रथमाद्विवचने वीक्षमाणौ इति रूपम्।
- धैर्यवन्तौ - धैर्यम् अस्य अस्ति इत्यर्थे धैर्यशब्दात् मतुप्-प्रत्यये धैर्यवन्तौ इति रूपम्।
- सुवर्णाभौ - सुवर्णा आभा ययोस्तौ सुवर्णाभौ इति बहुव्रीहिसमासः।
- चीरवाससौ - चीरं (खण्डं) वासः (वस्त्रं) ययोस्तौ चीरवाससौ इति बहुव्रीहिसमासः।
- वरभुजौ - वरौ भुजौ ययोस्तौ वरभुजौ इति बहुव्रीहिसमासः।
- पीडयन्तौ - पीड-धातोः शतृप्रत्यये प्रथमाद्विवचने पीडयन्तौ इति रूपम्।

सन्धिकार्यम् -

- पीडयन्ताविमाः = पीडयन्तौ + इमाः। (अच्-सन्धिः)

प्रयोगपरिवर्तनम् -

- समन्ततः पम्पातीररुहान् वृक्षान् वीक्षमाणाभ्याम् इमां शुभजलां नदीं शोभयद्भ्यां तरस्विभ्यां धैर्यवद्भ्यां सुवर्णाभ्यां चीरवासोभ्यां निःश्वसद्भ्यां वरभुजाभ्याम् इमाः वन्याः प्रजाः पीडयद्भ्यां युवाभ्यां काभ्यां (भूयते)।

सिंहविप्रेक्षितौ वीरौ महाबलपराक्रमौ।
शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ।।९।

अन्वयः - सिंहविप्रेक्षितौ शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ महाबलपराक्रमौ वीरौ (युवां कौ)।

अन्वयार्थः - सिंहविप्रक्षितौ सिंहातिबलविक्रमौ शक्रचापनिभे इन्द्रधनुस्तुल्ये चापे धनुषी गृहीत्वा संगृह्य शत्रुनाशनौ रिपुविनाशकौ महाबलपराक्रमौ महाबलशालिनौ वीरौ शूरौ (युवां कौ)।

सरलार्थः - सुग्रीवसचिवः हनुमान् रामलक्ष्मणौ प्रति पृच्छति यत्- सिंहात् अति अधिकबलवन्तौ इन्द्रधनुःसदृशधनुर्द्वयं गृहीत्वा शत्रूणां नाशकौ महाबलशालिनौ वीरौ युवां कौ इति।

तात्पर्यार्थः - प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमन्मुखेन रामलक्ष्मणयोः वीरत्वं वर्णयति। पशुराजस्य सिंहस्य प्रेक्षणं यथा सम्मुखस्थस्य कृते सर्वदा भयकरं भवति, तद्वत् प्रेक्षणम्

आसीत् रामलक्ष्मणयोः। तौ सिंहात् अपि अधिकबलवन्तौ आस्ताम्। महाबलशालिनोः तयोः पराक्रमात् शत्रवः अपि भीताः सञ्जाताः। देवेन्द्रस्य इन्द्रस्य धनुषः लक्ष्यं यथा न कदापि भ्रष्टं भवति, तथा अनयोः अपि धनुर्लक्ष्यं भ्रष्टं न भवति। धनुषः मुक्तिं प्राप्य शत्रुनाशनात् परम् एव अनयोः बाणः शान्तो भवति। तस्मात् हनुमान् तौ प्रति पृष्टवान् यत्- सिंहात् अपि अधिकबलवन्तौ महापराक्रमविशिष्टौ इन्द्रधनुःसदृशधनुर्धरौ युवां कौ, को वा युवयोः परिचयः, केन वा कारणेन इमं दुर्गमं देशम् आगतौ इति।

व्याकरणविमर्शः -

- सिंहविप्रेक्षितौ - सिंहस्य विप्रेक्षितं(प्रेक्षणं) सिंहविप्रेक्षितम् इति षष्ठीतत्पुरुषसमासः। सिंहविप्रेक्षितम् इव विप्रेक्षितं ययोस्तौ सिंहविप्रक्षितौ इति बहुव्रीहिसमासः।
- महाबलपराक्रमौ - महत् च तत् बलं महाबलम् इति कर्मधारयसमासः। महाबलम् एव पराक्रमः ययोस्तौ महाबलपराक्रमौ इति बहुव्रीहीसमासः।
- शक्रचापनिभे - शक्रस्य चापः शक्रचापः इति षष्ठीतत्पुरुषसमासः। शक्रचापेन निभे (तुल्ये) शक्रचापनिभे इति तृतीयातत्पुरुषसमासः।
- शत्रुनाशनौ - शत्रूणां नाशनौ शत्रुनाशनौ इति षष्ठीतत्पुरुषसमासः।

प्रयोगपरिवर्तनम् -

- सिंहविप्रेक्षितौ शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनाभ्यां महाबलपराक्रमाभ्यां वीराभ्यां (युवाभ्यां काभ्यां भूयते)।

अलङ्कारालोचना - अस्मिन् श्लोके उपमालङ्कारः वर्तते। उपमालङ्कारस्य चत्वारः अंशाः भवन्ति, ते च उपमेयम्, उपमानं, सादृश्यवाचकपदम्, सादृश्यधर्मः चेति। उपमा द्विविधा भवति पूर्णोपमा, लुप्तोपमा चेति। यत्र एते चत्वारः अंशाः एव तिष्ठन्ति सा पूर्णोपमा भवति। यत्र च एतेषां चतुर्णां मध्ये कश्चित् एकः ततोऽधिकः वा अंशः न तिष्ठति सा लुप्तोपमा भवति। अत्र उपमेयं हि चापे इति। उपमानं हि शक्रचापे इति। सादृश्यवाचकपदं हि निभे इति। सादृश्यधर्मः हि शत्रुनाशकत्वम् इति। अस्मिन् श्लोके चतुर्णाम् अंशानाम् एव सत्त्वात् पूर्णोपमा वर्तते।

श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ।
हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ।।१०।।

अन्वयः - श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ (युवां कौ)।

अन्वयार्थः - श्रीमन्तौ कान्तिमन्तौ रूपसंपन्नौ सौन्दर्ययुक्तौ वृषभश्रेष्ठविक्रमौ वृषभश्रेष्ठपराक्रमौ हस्तिहस्तोपमभुजौ गजशुण्डसदृशबाहुविशिष्टौ द्युतिमन्तौ तेजस्विनौ नरर्षभौ नरश्रेष्ठौ (युवां कौ)।

सरलार्थः - वानरोत्तमः हनुमान् रामलक्ष्मणौ प्रति पृच्छति यत्- कान्तिमन्तौ सौन्दर्यवन्तौ श्रेष्ठवृषभपराक्रमसदृशपराक्रमविशिष्टौ गजशुण्डसदृशभुजविशिष्टौ नरेषु उत्तमौ युवां कौ इति।

तात्पर्यार्थः - प्रस्तुतेऽस्मिन् श्लोके महर्षिः वाल्मीकिः हनुमन्माध्यमेन रामलक्ष्मणयोः सौन्दर्यस्य वीरत्वस्य च प्रशंसां करोति। रामलक्ष्मणौ वने स्थितवान्, वने लब्धं भोजनं भुक्तवान्, तथापि राजपुत्रवत् कान्तिमन्तौ सौन्दर्यवन्तौ च आस्ताम्। वृषभेषु श्रेष्ठवृषभस्य यथा विक्रमः भवति तादृशविक्रमशालिनौ आस्ताम् एतौ द्वौ। गजस्य शुण्डायां यथा शक्तिः तिष्ठति, तथा शक्तिः आसीत् अनयोः बाहुद्वये। एतौ ब्रह्मचर्यपालनात् महातेजस्विनौ आस्ताम्। नराणां मध्ये श्रेष्ठौ आस्ताम् एतौ। अत एव हनुमान् पृष्टवान् यत् - एवंविध-सौन्दर्यवन्तौ एवंविध-शक्तिमन्तौ युवां कौ, को वा युवयोः परिचयः, केन वा कारणेन इमं दुर्गमं देशम् आगतौ इति।

व्याकरणविमर्शः -

- रूपसंपन्नौ - रूपेण संपन्नौ रूपसंपन्नौ इति तृतीयातत्पुरुषसमासः।
- वृषभश्रेष्ठविक्रमौ - वृषभेषु श्रेष्ठः वृषभश्रेष्ठः इति सप्तमीतत्पुरुषसमासः। वृषभश्रेष्ठस्य विक्रमः वृषभश्रेष्ठविक्रमः इति षष्ठीतत्पुरुषसमासः। वृषभश्रेष्ठविक्रमः इव विक्रमः ययोस्तौ वृषभश्रेष्ठविक्रमौ इति बहुव्रीहिसमासः।
- हस्तिहस्तोपमभुजौ - हस्तिनः हस्तौ हस्तिहस्तौ इति षष्ठीतत्पुरुषसमासः। हस्तिहस्तौ उपमा ययोस्तौ हस्तिहस्तोपमौ इति बहुव्रीहिसमासः। हस्तिहस्तोपमौ भुजौ ययोः तौ हस्तिहस्तोपमभुजौ इति बहुब्रीहिसमासः।
- नरर्षभौ - नरेषु ऋषभौ नरर्षभौ इति सप्तमीतत्पुरुषसमासः।

प्रयोगपरिवर्तनम् - श्रीमद्भ्यां रूपसंपन्नाभ्यां वृषभश्रेष्ठविक्रमाभ्यां हस्तिहस्तोपमभुजाभ्यां द्युतिमद्भ्यां नरर्षभाभ्यां (युवाभ्यां काभ्यां भूयते)।

अलङ्कारालोचना - अस्मिन् श्लोके उपमालङ्कारः वर्तते। उपमालङ्कारस्य चत्वारः अंशाः भवन्ति, ते च उपमेयम्, उपमानं, सादृश्यवाचकपदम्, सादृश्यधर्मः चेति। उपमा द्विविधा भवति पूर्णोपमा, लुप्तोपमा चेति। यत्र एते चत्वारः अंशाः एव तिष्ठन्ति सा पूर्णोपमा भवति। यत्र च एतेषां चतुर्णां मध्ये कश्चित् एकः ततोऽधिकः वा अंशः न तिष्ठति सा लुप्तोपमा भवति। अत्र उपमेयं हि भुजौ इति। उपमानं हि हस्तिहस्तौ इति। सादृश्यवाचकपदं हि उपमा इति। सादृश्यधर्मः हि शक्तिमत्त्वम् इति। सादृश्यधर्मस्य असत्त्वात् अस्मिन् श्लोके लुप्तोपमा वर्तते।

पाठगतप्रश्नाः-

१) हनुमान् कस्य वचः विज्ञाय ऋष्यमूकपर्वतात् पुप्लुवे।

२) हनुमान् कस्मात् पर्वतात् पुप्लुवे।

३) हनुमान् कस्य पुत्रः आसीत्।

४) हनुमान् किं रूपं धृत्वा रामलक्ष्मणयोः समीपं गतवान्।

५) हनुमान् कीदृश्या वाचा रामलक्ष्मणौ प्रशशंस।

६) रामलक्ष्मणौ कान् त्रासयन्तौ तं देशं प्राप्तवन्तौ।

७) रामलक्ष्मणौ कस्याः नद्याः तीरे वृक्षान् वीक्षमाणौ आस्ताम्।

८) पम्पानदी कीदृशी आसीत्।

९) रामलक्ष्मणौ काः पीडयन्तौ आस्ताम्।

१०) रामलक्ष्मणौ कीदृशे चापे गृहीतवन्तौ।

११) रामलक्ष्मणयोः भुजौ कीदृशौ आस्ताम्।

१२) रामहनुमतोः प्रथमः संवादः रामायणस्य कस्मिन् काण्डे अस्ति।

क)किष्किन्धाकाण्डे ख)अरण्यकाण्डे

ग)सुन्दरकाण्डे घ)युद्धकाण्डे

१३) हनुमान् कस्मात् पर्वतात् रामलक्ष्णयोः समीपं गतवान्।

क)हिमालयः ख)विन्ध्यः

ग)ऋष्यमूकः घ)अयोध्या

१४)हनुमान् किं रूपं धृतवान्।

क)मनुष्यरूपम् ख)भिक्षुरूपम्

ग)ब्राह्मणरूपम् घ)राजरूपम्

१५)रामलक्ष्मणौ कस्या नद्याः तीरे उपस्थितौ आस्ताम्।

क)गङ्गा ख)यमुना

ग)पद्मा घ)पम्पा

१६)हस्तिहस्तोपमभुजौ...इत्यत्र कः अलङ्कारः वर्तते।

क)रूपकालङ्कारः ख)दृष्टान्तालङ्कारः

ग)उपमालङ्कारः घ)अनुप्रासालङ्कारः

१७)क-स्तम्भेन सह ख-स्तम्भं मेलयतु - -

क-स्तम्भः	**ख-स्तम्भः**
१. पुप्लुवे	क. भाषितवान्
२. रामायणम्	ख. कपिः
३. आबभाषे	ग. उक्तवान्
४. पम्पा	घ. प्राप
५. हनुमान्	ङ. जगाम

६. भेजे	च. पर्वतः
७. ऋष्यमूकः	छ. वाल्मीकिः
८. उवाच	ज. शुभजला

पाठसारः

वनवासकाले सीतायाः अन्वेषणस्य कृते साहाय्यप्रार्थनार्थं श्रीरामः भ्रात्रा लक्ष्मणेन सह सुग्रीवस्य समीपं जिगमिषुः पम्पासरोवरस्य तीरे समुपस्थितः। ततः किञ्चित् दूरे ऋष्यमूकनामके पर्वते वानरेश्वरः सुग्रीवः भ्रातुः वालिनः भयात् गुप्ततया निवसति स्म। स सग्रीवः दूरात् धनुर्बाणादिशस्त्रयुक्तौ दीर्घबाहुसम्पन्नौ तौ तपस्विनौ वनवासिनौ दृष्टवान्। तस्मात् स चिन्तितवान् यत् - तस्य भ्राता वाली एव तस्य मारणाय तौ शस्त्रधरौ अत्र प्रेषितवान् इति। अतः स अतीव भीतः जातः। तस्य सचिवः आसीत् हनुमान्। तस्मात् पम्पासरोवरतीरे स्थितौ तौ तपस्विनौ केन कारणेन अत्र आगतवन्तौ इति ज्ञानाय सुग्रीवः सचिवाय हनुमते आदिष्टवान्। हनुमान् च राजानुसारेण स्वस्य वानररूपं विहाय भिक्षुकवेषेण तयोः समीपं गतवान्।

तत्र गत्वा स आदौ अतिथिज्ञानेन तयोः प्रणामं कृतवान्। ततः विध्यनुसारं तयोः पूजनं कृत्वा स्वस्य मधुरेण मनोहरेण च वचनेन तयोः प्रशंसां कर्तुम् आरब्धवान्। रामलक्ष्मणौ स्वस्य ब्रह्मचर्यतेजसा वनस्थान् मृगान् अन्यान् प्राणिनः च त्रासयन्तौ आस्ताम। तयोः सौन्दर्यप्रभावात् पवित्रजलविशिष्टः पम्पासरोवरः अपि शोभते स्म। सम्पूर्णं दिवसं व्याप्य तौ भ्रातरौ वनसञ्चारं कृत्वा क्लान्तौ सञ्जातौ। तयोः एतादृशं कष्टं दृष्ट्वा तु अन्ये वनवासिनः अपि दुःखिताः अभवन्। तयोः शरीरस्य कान्तिः सुवर्णवत् आसीत्, परन्तु तथा सत्त्वेऽपि तयोः परिधाने आसीत् केवलं द्वौ खण्डवस्त्रौ। इन्द्रधनुर्वत् लक्ष्यभेदि आसीत् तयोः धनुः।गजशुण्डासदृशबलयुक्तहस्तविशिष्टौ तौ रूपसम्पन्नौ रामलक्ष्मणौ सकलमनुष्येषु श्रेष्ठौ आस्ताम् इति अस्य पाठस्य सारः।

किमधिगतम्

- गृहस्थान् प्रति भिक्षुणा प्रणामः कर्तव्यः।
- अतिथिः सदा पूजनीयः।
- ब्रह्मचर्यं यथायथं पाल्यते चेत् शरीरे महत् तेजः उत्पद्यते।
- कस्यापि परिचयः ज्ञातव्यः चेत् तेन सह मधुरवाचा वार्तालापः करणीयः।
- कस्यापि मिथ्याप्रशंसा न कर्तव्या।

पाठान्तप्रश्नाः

१) रामलक्ष्मणाभ्यां सह हनुमतः प्रथमसाक्षात्कारविषये संक्षेपेण लिखत।

२) हनुमान् कथं भिक्षुकवेषेण रामलक्ष्मणयोः समीपं गतवान्।

३) तत्र गमनान्तरं हनुमान् किं किं कृतवान् इति सप्रसङ्गं वर्णयत।

४) रामलक्ष्मणौ केन प्रकारेण वन्याः प्रजाः पीडयतः स्म।

५) रामलक्ष्मणयोः धनुर्विषये संक्षेपेण किञ्चित् आलोचयत।

६) चक्रचापनिभे चापे.........इत्यत्र यः अलङ्कारः वर्तते, तद्विषये संक्षेपेण आलोचयत।

उत्तरतालिका

१) सुग्रीवस्य

२) ऋष्यमूकात्

३) मारुतस्य

४) भिक्षुरूपम्

५) श्लक्ष्णया सुमनोज्ञया

६) मृगगणान् अन्यान् वनचारिणः च

७) पम्पानद्याः

८) शुभजला

९) प्रजाः

१०) चक्रचापनिभे

११) हस्तिहस्तोपमौ

१२) क)

१३) ग)

१४) ख)

१५) घ)

१६) ग)

१७) १-ङ, २-छ, ३-क, ४-ज, ५-ख, ६-घ, ७-च, ८-ग।

॥ इति द्वादशः पाठः ॥